विवादे यन्द्रिहानस्य युक्तं चान्यनुशासनं। भाव्यं इण्डपराच:ै: प्रयुक्तं कुशलै: पुन:।
अनिष्टार्थेषु स्वयेषु महामर्मगतेष्विव। सविवादेषु चापेषां कालपेक्षी व्यधान्नृप:।
पथ्ये पार्थिवस्थैत्यं निश्चांध तस्य पालनं। प्रजास्वशागच्छकस्य मनोरिव मनस्विन:।
सत्यं कारणनिर्णयेचमिनतावहारहीना सती भावाबीतअनापवाद उचितोत्थितं समस्तप्रियं। १६०
विरक्ताविभवान्विता तदणिमा पारिस्रवर्गोज्झिता राजते विकलं कमन चरने काले किलेत्यन्यथा।
स तादृशोऽपि राजेन्द्रचन्द्रमा: स किलाभवत्। मात्सर्याविष्टवैवश्याद्दोषोत्कावधंघोषण:।
चौदार्य्यशौर्य्यधीधैर्य्यगुणताद्वमसर:। बभूव संख्यातीतानां मानप्राणहरो नृणां।
मानोत्कतेन भवोऽपि वाक्पारुष्यवादते:। लाघवं प्रत्युपालम्भै: पार्थिवोऽप्यनुभावित:।
प्रसुप्तानां फणीन्द्राणामिव कोपोद्भवं विना। तेजोविस्फूर्जितं स्रेयं नहि नाम शरीरिणां। १६५
विविधे भूतवर्गेऽस्मिन्नच कथितस्थिते। वपुर्वेश्चरित्रादि यस्य रोचेनं दूषितं।
जाति: पञ्चवाद्वपु: कपिलता साने शिर:खण्डनं प्रस्थस्यान् घुविशीलता दिग्विगुणाचारसङ्कुलं बन:।

विश्वस्पृगिति प्रभूतविषयव्याप्तिस्पृशो दुस्सहा दोषा यत्र पुरस्तु तत्र कतमो निर्दोषतोत्सेकभूः ।
अविचार्य्येति भूपालः स चकारानुजीवनं । संग्रामारिचदेशादिदोषोद्घोषेण सत्वरं ।
अन्योन्यदोषमुत्पाद्य संख्यातीता महाभटाः । युद्धश्रद्धालुना तेन द्वन्द्वयुद्धेषु घातिताः । १७०
मासार्द्धदिनमाहेन्द्रमहाद्यवसरेषु सः । निनाय योधान् सन्नद्धानन्योन्यं प्रधनैधनं ।
न साभूदुत्सवः कश्चित्तदा यत्र नृपाङ्गने । भूमिर्न सिक्ता रक्तेन हाहाकारो न चोत्थितः ।
नृत्यन्त इव निर्याता रङ्गेभ्यो संग्रामिनः । सांधवैर्निन्यिरे योधाल्लूनाङ्गाः पार्थिवाङ्गनात् ।
स्निग्धश्यामकचास्तारक्षस्रूनाकल्पशोभिनः । हतान् वीक्ष्य भटाभाजा मुमुदे न च विव्यथे ।
सार्थो राजगृहं गत्वा प्रत्यायातेषु भर्तृषु । मेनिरे दिवसं लब्धमनास्था नित्यमन्यथा । १७५
भक्तस्यदहं कुर्य्यामित्यहंक्रियया वदन् । सान्विच्छमव्याहतशक्तिर्भृत्यैरजियहत् ।
प्रवर्द्धमानांस्तानेव विद्धः कलुषाशयः । स्वाधिकारान् विदधे बङ्गस्य विमानिताम् ।
दंशकः कम्पनाधीशः प्रविष्टे तत्र सङ्कुधि । विद्धो विषलाटायां निपत्य निहतः खङ्गैः ।
तेन स्ववर्द्धितो द्वाराधीश्वरो रुक्काभिधः । स्वाधिकारो विदधे विभूतिं वीक्ष्य भूयसीं ।
माणिक्यसैन्यपतिना द्वारेऽकस्मान्निवारिते । स्त्रिजेन विजयश्चक्रे चक्रे हस्तपरिग्रहः । १८०
कम्पनाद्यधिकारस्थाः प्रवीरास्तिलकादयः । काकवंशादिसम्भूताः न तेनापि न भाविताः ।
भोगसेनानिरङ्कुशः क्षोणवासोऽभवत्ततः । तेनानिमित्तप्रीतेन राजस्थानाधिकारभाक् ।
यस्सेन्द्रादद्भीयुद्धे सन्द्रसैन्योऽपि विद्रुतः । शूरवङ्गावस्रोऽपि गौरमालोक्य विक्रमं ।
येऽपि मञ्जाभिधानस्य पुत्राः सामान्यमन्त्रिणः । तान् सङ्कुच्य कुर्व्यन्यामन्त्रिणः समपादयत् ।
पुत्रौ विजयसिंहस्य तस्यैवात्मकद्दशौ । तिलको जनकश्चास्तामामात्यश्रेणिमध्यगौ । १८५
यशेलाभायवाणादिमुख्या द्वारादिनायकाः । कस्तान् समर्थः सङ्ख्यातुं तद्विस्तरसम्पदः ।
द्विचाः प्रशान्तकलशादयः पूर्वं तदन्तरे । प्रापुर्बालस्मारुमाञ्जोर्णनौकाविभ्रमं ।
कन्दर्पः स्म भृशा दूतैः समानीतोऽपि नाददे । तस्यामहत्तां वीक्ष्य मार्यिनोऽप्यधिकारितां ।
आस्थानाचारसंलापव्यवहारादिमण्डले । सर्वमेवाभवत् सर्वं तस्मिन्नभिनवे नृपे ।
सर्वाः कार्म्मणचूर्णाद्धवेश्याया विश्ववर्त्तिनः । धीरानपि विधायैवं करोत्यन्मार्गवर्त्तिनः । १९०
सपिण्डानामपि व्यक्तमूलवीक्षणतत्परा । प्रसतेर नरेन्द्रश्रीर्जातिस्नेहापकारिणी ।
समस्तसम्पत्पूर्णोऽपि यस्मात् सुस्सलभूपतिः । दध्यौ भ्रातुरवस्कन्दं राज्यापहरणोद्यतः ।
अकस्मादग्रणोपक्षीनमिव तं शीवपालितं । स्थाने वराहवास्तोस्थमुल्लंघ्यायातसम्पदः ।
चिरप्रकारी विनिर्गत्य तमप्राप्तपदं ततः । निपत्य सैन्यैर्बहुलैः सोऽपकारमकारयत् ।
विदुनन्दास्पदे तस्य नानापकारगोस्रुतैः । तास्मूलवनाकुट्टेय मासियो समभावत । १९५
कृतकार्य्यः परावृत्यासावकृष्टोऽपि पार्थिवः । प्रत्याहर्त्तुं तमभ्युपेणोद्ययौ क्रूरविक्रमं ।
गगनचन्द्रसादादेशाद्भुत्वा बहलसैनिकः । चक्रे सुस्सलभूपालबलनिर्दलनं ततः ।

२ अ

समक्षैः सोस्सलैर्योधैराहवायामनिश्चलैः । शान्तिर्निर्मानयोधानेषु सुमरोणामसूयत ।
भर्तुः प्रमादस्यानृण्यं प्राणैर्युधि समर्पितैः । राजपुत्रौ गतौ तत्र सहदेवयुधिष्ठिरौ ।
वराश्वान् सुस्सलानीकान् गम्यमानान् प्राप विद्रुतान् । चक्रे भूरितुरङ्गस्य येभूपस्यापि कौतुकं ।
निविष्टकटकं तं स श्रुत्वा सैन्यपुराध्वना । कमराज्योन्मुखं यातुं द्रुतमन्वसरन्नृपः ।
अम्बिष्यमाणसरणिः प्रयत्नादग्रजन्मना । प्रविवेश दरद्देशं परिमेयपरिच्छदः ।
दत्तमार्गं तस्य राजा डामरं लोष्टकाभिधं । स सैन्यपुरजं हत्वा नगरं प्राविशत्ततः ।
तस्मिन् दूरं गते वैरे कलुषोऽपि स नाददे । भ्रातृस्नेहेरसंरम्भं ग्रहीतुं लोहरं गिरिं ।
कह्नः कालिन्दराधीशो दौहित्रीं पुत्रवद्दृढौ । यामवर्द्धयत स्नेहादपुत्रः पितृवर्जितां ।
राज्ञो विजयपालस्य सुतां सुस्सलभूपतिः । उपयेमे स तां श्रीमाननघां मेघमञ्जरीं ।
तस्य प्रभावाधिष्ठानाच्छिन्नेऽपि स लोहरे । प्रकिरासीत् विरुद्धानामपि बाधाय वैरिणां ।
धीरः सुस्सलदेवोऽपि सर्गैर्निर्गत्य दुर्गमैः । आसदद्भूरिभिर्मासैः स्वोर्व्वीं दुर्गिरिवर्त्मना ।
प्रशान्ते व्यसने तस्मिन् धीरस्योच्चलभूपतेः । अन्योऽपि व्यसनाभासा उत्पन्नध्वंसिनोऽभवन् ।
भीमादेवः समुत्थाय सोऽजह्लसदेवजं । साहायकार्थमानिन्ये दरद्राजं जगद्दलं ।
सङ्ग्रहार्थं सहीभर्तुरवरुद्धात्मजोऽभवन् । भ्राता दर्शनपालस्य मल्लपालस्तु तद्दलं ।
नीतिज्ञेन ततो राज्ञा साव्वेव दरदीश्वरः । आक्षेपात् पारितप्रायात्प्रत्याहृत्य निजां भुवं ।
मल्लमात्मनात्स्वं सोऽजोऽविश्वस्तमण्डलं । सेजे सुस्सलदेवस्था मल्लपालानुजीवितां ।
गृहीतां न मन्येन निजेनैव प्रदर्शितः । सोऽजः क्षिप्रं नृपात्प्राप निग्रहं तस्करोचितं ।
देवेश्वरात्मजः पित्र्यकोऽपि देराज्यलालसः । डामरानाश्रिते राज्ञि निर्याते व्यद्रवद्दिशः ।
विचारपरिहारेण धावन्तः सर्व्वतो जवात् । तिर्य्यञ्च इव हास्याय प्रसिद्धमरणा जनाः ।
मलस्य रामलाख्योऽहं सूनुरासं दिगन्तरे । अर्द्धस्तदः कश्चिदेवं चक्रिकाचतुरो वदन् ।
निन्ये प्रसिद्धिं व्यामूढैर्वञ्चभिर्विश्रवप्रियैः । धनमानादिदानेन भूमिपैर्भूम्यनन्तरः ।
पीर्म प्रविष्टः कश्मीरानेकाकी घर्मपीडितः । व्यधीयत क्षत्रनामः परिज्ञाय नृपानुगैः ।
कटके पर्य्यटत्यास्त्रः सएव ददृशे पुनः । स्वजात्युचितमद्यादिविक्रयी सस्मितं जनैः ।
मिथ्यैव नीतिकौटिल्यैः क्रियतेऽभ्युदयश्रमः । शक्यतेऽपरथा कर्त्तुं न दैवस्य मनीषितं ।
शाम्यापि ज्वलति क्वापि क्वचिद्दीप्तापि शाम्यति । दैववातवशाच्छक्तिः पुंसः कक्षाग्निसन्निभा ।
पलायकं नापयति निश्चला भवितव्यता । देहिनां पुच्छसंलीना वह्निज्वालेव पक्षिणः ।
नास्ति शवक्लिविषमव्यवप्रियाङ्गैर्ग्भपातरभसेन सधाभिचरैः ।
शक्ता निहन्तुमसवो विधुरैरकाण्डे भोक्तव्यभोगनियतोज्झितस्य जन्तोः ।
भिक्षाचरः समादिष्टवधो जयसतीपहात् । ततं बध्यभुवं निन्ये बधकैः पार्थिवाज्ञया ।
यान्ति प्रस्फुरस्य निश्चितो विनस्तायां समीरणैः । छिन्नस्तटान्तरे स्यन्दमानहस्ते कृपालुना ।

द्विजेनैकेन सम्प्राप्तश्रिया दुर्गतचेतनः । आसमत्यभिधानायाः ख्यातिर्दद्देति गौरवात् ।
सा हि पुत्रीति सत्याथादस्त्वसुरया तया । नीतो देशान्तरं गूढं वद्धे दक्षिणापथे ।
स कृतप्रत्यभिज्ञोऽथ पुत्त्रवत्सरवर्मणा । मालवेन्द्रेण शास्त्रास्त्रविद्याभ्यासमकार्यत । ११०
अन्यदीयं घातयित्वा तत्तुल्यवयसं शिशुं । रक्षितो जयमत्येव स किलेत्यपरेऽब्रुवन् ।
देशान्तरागताद्दूतात्तद्वार्त्तामुपलब्धवान् । अतएवाभवत्तस्यां भूभृद्विगलितादरः ।
बहिरप्रतिभिन्दंस्तत्स धीरो मार्गवर्त्तिभिः । चक्रे तदप्रवेशाय सम्बन्धं पार्थिवैः समं ।
ईर्ष्यामगोपयत्तस्याः श्रद्धामाच्छादयत्ततः । स्वयमन्याभिगम्यत्वं करोति हि जडो जनः ।
भिक्षाचरे हते बालं कश्चिदादाय तत्समं । तन्नाम्ना ख्यातिमनयद्दैवेत्यपरेऽब्रुवन् । ११५
तथैवैषोऽस्तु मिथ्या वा प्रतिष्ठां तां तथाप्तवान् । यया लघुत्वमानेतुं न दैवेनाप्यशक्यत ।
स्वप्नेन्द्रजालमायानामपि निर्विषया इमाः । कर्म्मवैचित्र्यजनिताः काश्चिदाश्चर्यविप्रुषः ।
सराजबीजी नाशाय विशां गूढं व्यवर्द्धत । पुरग्रामादिदाहाय कक्षान्तरिव पावकः ।
रोहत्यन्तिकमौमनि प्रतिविषा वीरुद्विषस्यारुहः काले प्रावृषि पद्मनाभसलिले मूर्च्छत्यगस्त्योदयः ।
सर्गच्छेदविधित्समानुदयतो दृष्ट्वा किलोपद्रवान् सन्धत्ते प्रतिकारकल्पनमहो दीर्घावलोको विधिः । १२०
अजायत विपक्षाक्षजगद्दुरणक्षमः । तस्मिन्नेव क्षणे यस्मात्सुस्सलक्ष्मापतेः सुतः ।
तज्जन्मकालादारभ्य सर्व्वतो जयमर्ज्जयन् । नामान्वर्थं नृपस्तस्य जयसिंह इति व्यधात् ।
शास्तुः सर्वार्थसिद्धस्य यथा सर्व्वार्थसिद्धिभिः । तथा तस्याभिधान्वर्था नात्यजत्कृतिशस्ततां ।
मुद्रां तां कुङ्कुमस्याङ्कस्तदीयस्याभ्युपागतां । विलोक्योच्चलदेवोऽभूद्विमन्युर्भ्रातरं प्रति ।
बालस्यैवाङ्घ्रिमुद्रास्य वैरं पितृपितृव्ययोः । निवारयन्ती विदधे सुश्लिष्टं मण्डलद्वयं । १२५
स स्वर्गिणः पितुर्नाम्ना ततः सुकृतसिद्धये । चकारोच्चलभूपालः पैतृके स्थण्डिले मठं ।
गोभूमिहेमवस्त्रान्नदाता तस्मिन्महोत्सवे । आश्चर्यकल्पवृक्षत्वं त्यागी सर्वार्थिनामगात् ।
प्रसादैः प्रहितैस्तेन महार्घ्यैः श्लाघ्यसम्पदा । महान्तोऽपि दिगन्तेषु पार्थिवा विस्मयं ययुः ।
भर्त्तुः प्रसादाधिगतां श्रियं नेतुं परार्थतां । विहारं समठं देवी जयमत्यपि निर्ममे ।
केषाञ्चित्पूर्व्वपुण्यानां विरहेण महीभुजः । सुताभीष्टाभिधानाभून्मठे नवमठाख्यया । १३०
स्वलां स्वसारमुद्दिश्य परस्मिन्स्थण्डिले पितुः । विहारोऽपि कृतस्तेन नोचितां ख्यातिमाययौ ।
स्नेहाद्धस्तकपालित्वं तस्याः कलयता किल । न निष्ठा स्वप्रतिष्ठासु सम्प्रपेदे व्यवस्थितिः ।
कदाचित्कमराज्यस्थो द्रष्टुमग्निं स्वयंभुवं । ययौ वर्हणचक्राख्यं गिरिग्रामं स भूपतिः ।
तद्दस्वैलस्वरग्रामाध्वना यातुमचेष्टयन् । अकस्मादेत्य तचत्याश्चौरायणडामरास्त्रिणः ।
प्रजिहीर्षुभिरप्यासु तस्मिन्नत्यल्पसैनिके । न तैः प्रहृतमत्युग्रजीवदस्त्रस्तितायुधैः । १३५
अथ हारितमार्गः स गहने गिरिगह्वरे । भ्रमन्नल्पानुयायीकः क्षणदामत्यवाहयत् ।
उच्चचार क्षणे तस्मिन्स्कन्धावारेषु दुःश्रवा । न चिरं प्रातर्दुर्वार्त्ता सर्वतः क्षोभकारिणी ।

कटकाश्विः खतात्यन्या वात्येव गिरिगह्वरात्। सा दुष्टहस्तिदीर्घत्वं पुरेऽन्यदवासदत्।
नगराधिकृतस्तस्मिन् वर्षे चक्राभिधोऽभवत्। प्रक्षिप्तः कामदेवस्य कुक्षौरङ्गादिमोदरः।
ज्ञात्वा पुरक्षोभशान्तिं प्रवेशाय नृपास्पदे। प्रविश्य भ्रातृभिः सार्द्धं कार्य्यशेषमचिन्तयत्। २६०
नृपं कं कुर्म इत्येवं तान् विचिन्तयतोऽब्रवीत्। शङ्खाभिधोऽपि कायस्थः कुटुम्बिकुटिलाशयः।
यूयमेव सुहृदस्तुभृत्यवाञ्छयदक्षयाः। राज्यं कुरुत सम्प्राप्य राष्ट्रमेतमकण्टकं।
तेनैवमुक्तास्ते पापाजातराज्यस्पृहास्ततः। सिंहासनाधिरोहाय क्षिप्रमासन् समुद्यताः।
श्रीयशस्करदेवस्य वंशस्यायत इति श्रुतिः। तदन्वयेऽस्तु तेष्वेषां राज्यात्युपप्रदायिनी।
अतएवाभजत्क्रोधं तेषां कुमुद्वद्धिभिः। सा वाससांस्तःसंलीना सदा चारानपेक्षितां। २६५
कथं वः प्रतिभात्येषां मङ्गृह्यापि कुयद्धतिः। भागिकस्य कुले जातो लवटस्य हि सोऽधमः।
क्षेमदेवाभिधानस्य पुत्रोऽप्यस्यनियोगिनः। कुराप्रयत्नमभजम्महामात्यमिकोचितं।
चौर्य्येण स्वर्णभृङ्गारं चनवान् भूपतेर्गृहात्। सम्भाविनोऽपि गाम्भीर्य्यात्स्त्राय स किलेङ्गितैः।
सामिधेनुनिरूपणेषि विक्रमस्खलितान् सयत्। राजपुत्रदेवत्यन्यं स चैत्यं समन्यत।
तस्य चिन्ता काचिदासीत् सदा देशाद्यतोऽङ्गलोः। या राज्यहेतुकृत्येन फलेन सनभाव्यत। २७०
नद्दिरानिजसङ्कल्पादपि ते राज्यलालसाः। नृपं जीवनमाकर्ण्य ततोऽभवन् हतस्पृहाः।
न स्फुरत्स्वच संसीलसता सुप्त इवासिशः। तेषां चेतसि सङ्कल्पसदाप्रभृति सोऽभवत्।
अमुस्मिन्नादरेणाथ शनकैः पृथिवीभुजा। निर्न्यिरे मध्यमां वृत्तिं राजस्थानाधिवार्यं ते।
प्रकृत्या रूढवायाजा सर्व्वेषामेव सर्व्वदा। तेषामप्यकरोदन्यान्तर्मस्सप्रस्रः कथाः।
ते राज्ये स्वभूभर्तुः पितरि प्रभयं गते। मातुलात्पक्षमन्तया विधवाया स्वतेऽवमन्। २७५
तैर्भ्रामकको नाम शक्तभूस्थानिवेशिकः। स्पृष्टुतोऽथ विश्वस्तो जननीगारशङ्कया।
अननीमपि किं नैते न्यस्यचक्रिति भूपतिः। विचार्य कोपात्तस्मात्तु नामच्छेदमकारयत्।
तां कथां स नृपस्तेषां परोक्षमुदघोषयत्। क पुष्पाञ्चिकतनःमाया वदस्मिन्यन्विषेव च।
वृहद्भ्यादिगर्वेषु कृत्वा कार्य्याण्यवारयत्। स कायस्थः कृतान्तत्वं भजन् मङ्गमपि प्रभुः।
पोषितस्तेन रौद्रेण सिञोऽथ गणनापतिः। कोशोत्पत्त्यथसंसारं तं नृपाय न्यवेदयत्। २८०
प्रवेशभागिकपदे चने राज्ञा कृपा ततः। स कूरिरङ्कुशादीन् प्रेरयन् पूर्व्वविस्मिते।
जिघांसवस्ते नृपतिं प्रसङ्गप्रेक्षिणः परैः। समगंसत दुष्टजैरथ हंसरथादिभिः।
प्रजिहीर्षुभिरुर्व्वीशं पौनकोशैः समेत्य तैः। चतुष्पञ्चानि वर्षाणि गताप्यवसरः क्वचित्।
बहुभिर्व्यञ्जधा भिन्नैश्चक्षुकाले विचिन्तितः। न भेदमगमत्स्त्र्यः सचिवं लोकदृक्कृतैः।
सर्वेतां कुरुते प्रत्यक्षपो सर्व्वस्वं कथां। इति प्रत्येकमुक्ता ते विरागं पार्थिवेऽभजन्। २८५
तेहरःपार्श्वपृष्ठादि गूढैश्चैर्भिरायसैः। प्रच्छाद्य पार्थिवोऽयजनत्तमसं जिघांसुभिः।
चण्डो विरहं सोढुं यां प्रसादयितुं न कां। राजापि सन्दधे चेष्टां प्राक् प्राकृतभुजङ्गवत्।

स्वभाववैपरीत्येन मार्गचिह्नेन स स्थिरां । अयमत्या महाप्रीतिं तदादाद्वत्सरद्वयं ।
रक्षां भिक्षाचरस्याङ्गनिमित्तं तच केवल । केचित्तु विग्रहद्वन्द्वौ प्रेक्षां तरलद्वर्शितां ।
अथ वर्तुलभूभर्तुरात्मजा विभ्लवाभिधा । कनपाणिग्रहस्यागाद्वाल्यं वसुधाभुजः । ८९०
सङ्ग्रामपाले नृपतौ तस्मिन्नवसरे मृते । तत्सूनुः सोमपालाख्यः पितृराज्यं समादधे ।
राज्यार्हमग्रजं बद्धा सोऽभ्यषिच्यत चाक्रिकैः । इति कोपाकरेन्द्रोऽभूत् क्रुध्यन् राजपुरीं प्रति ।
लक्ष्मीस्थैर्यप्रतिभुवः पृथ्व्याः पाणिमजिग्रहत् । तं प्रेष्ठं सर्वलोकानां श्रेष्ठं सर्वक्षमाभुजां ।
अर्थिचिन्तामणेस्तस्य प्रीणतो निखिलाः प्रजाः । नानाव्ययार्जितो रेजे पश्चिमः स महोत्सवः ।
याते जामातरि क्ष्माभृच्चक्रे निखिलतर्पणः । निर्दृतीन् किमपि क्रुध्यन् द्रुग्धं तु व्यसर्जयत् । ८९५
भोगसेनोऽपि भूपेन काले तस्मिन् समन्युना । निवारितो द्वारकार्य्यात्तद्वैरः समपद्यत ।
निक्रान्तः स हि कार्य्येभ्यो निर्जितः खिल डामरः । सुस्सलस्यार्पितं जेतुं प्रतस्थे लोहर पुरा ।
वात्सल्यमिश्रवैरेण वारितोऽथ महीभुजा । तत्परीवादसक रोषु कोधावेत्य तत्र सः ।
प्रावेशयत् रड्डकड्डमुखान् स समया ततः । तमादिसुखदं वीरं तदा राज्ञा विमानितं ।
विमानिताविशालेषकाः संहता हतदृत्तयः । न ते बहिष्कृतास्तेन समरार्थं जिगीषया । ९००
तान् भोगसेन जिन्यसमद्भावान् कुटिलाशयः । सङ्गो निनिन्द वीरत्वात्सस्यामम् सरलात्मरं ।
ऊचे चाद्यैव हित्वापि प्राणान् व्यापद्यतां नृपः । भोगसेनोऽन्यथा सेदं कुर्य्यादगह माश्रयः ।
अन्यथाभूय सङ्गोकं भोगसेनं यदब्रवीत् । निश्चिद्रोऽस्मि वदेति नृ नि सेद्लाननः ।
स तु किं दक्षिणद्वारं तव द्द्यामिति ब्रुवन् । द्भुजुपचप्रणयं मिन्यै तमवमानयत् ।
प्रबोधाधायिनो दैष्टि नियतिप्रणयी भवन् । तापात्ययाहनिद्रान्तरव जन्तुगतस्मृतिः । ९०५
तस्मिन्गो यामिका भूत्वा स्वस्मिन्वारे ततोऽविशन् । ते राजधानीं सन्नद्धैः स्वसैन्यैः सह संहताः ।
यामिन्यां यं त्वयं इन्यन्तां हतेत्यभिधाय च । प्रावेशयत् न्यस्तचिह्नांश्चण्डालान्मण्डपान्तरं ।
भुक्तोत्तरं स्थिते राज्ञि ते वाह्य मण्डपे स्थिताः । सरोषनृपद्त्युक्ता मेवको मारणे व्यधुः ।
राजा च विक्लवोत्सव चिदासुर्मण्डपान्तरात् । दीपिकाभिःकृतालोको निर्ययौ मदनालसः
मध्यमं मण्डपं तस्मिन् प्राप्ते स्वल्पैः सहानुगैः । तत्यां मण्डपं सङ्गो कद्धान्यानदगान्मनान् । ९१०
अन्यैरप्यपिते द्वारे निरुद्धे सर्वएव ते । जिघांसवः समुत्थाय नृपतिं पर्य्यवारयन् ।
विक्रमिदत्वादेकेन रड्डमये निवेदुषा । तं दिंशादोर्घतत्त्वसाः शस्त्रा कयकवोऽभिनन् ।
ततः काञ्चनगौराणि तस्याङ्गान्यसिधेनवः । वस्त्रवः सुमेरुघट्टाणि महोरग्यइव विशन् ।
स द्रोहो द्रोहदत्युक्ता केशान् छटाभ्यिमाचयन् । क्रीडाशक्त्या कथां रड्डमुष्टिं दन्तौर्ध्वपाटयत् ।
सुजनाकरनामा हि भृत्यः कट्टारकं वहन् । तस्याभ्निकात्पत्तायिष्ट प्रहरत्सु विरोधिषु । ९१५
अतो वाले चितो लक्ष्मीं छुरिकां स चकर्ष तां । मुष्टावर्गलिता कोशात् सा कष्टेन विनिर्ययौ ।

निर्यातास्त्र: शत्रुभिस्तैस्त्यक्तकेशो बबन्ध तं । धम्मिल्लमथ तां शर्वी आगुहन्नाम्रपेयत्।
न छित्त्वा प्रहरंस्तेजस्मादृम्भीर्योऽपि सोऽभवत। येन छितौ निपतित: सर्वमर्मस्विवाहत: ।
अभिनच्च ततो रङ्गं प्रहरन्तश्च पृष्ठत: । मदन् सिंह इव व्यङ्गं परिव्यज्य व्यदारयत् ।
अन्यश्च शस्त्रिणं कश्चित्सवर्माणमपातयत् । विवेष्टमानो य: प्राणैरचिरेण व्ययुज्यत ।
तस्याकारे प्रवासाय तस्मिन्धावति मण्डप: । रक्षिभिर्भूमिपालोऽयमित्यवज्ञा कपाटित: ।
द्वारमन्यत् प्रवर्धन् स क प्रयासीति जल्पता । खड्गेन हृदुमार्गेण खड्गपातैरहन्यत ।
भोगसेनं ततोऽपश्यत् द्वारस्यान्ते समुत्थितं । दारुतूलिकया भित्तिमालिखन्तं पराङ्मुखं ।
भोगसेने चमे कस्मादमुं क्षमिति वादिनं । सोऽस्यक किमपि ह्रीत: प्रधावन्तं जगाद तं ।
रथ्यावह्नाभिधा दीपधरस्तिष्ठन्निरायुध: । अयोदीपिकयारम्भयुद्धस्तैर्निहतोऽपतत् ।
चाम्पेय: सोमपालाख्यराजपुत्त्र: क्षताहित: । प्रहारै: प्राप्तवैकल्यो न याच्ञाचारतामगात् ।
पुत्त्र: श्रीशूरपालस्य राजकापत्यमश्नक: । विदद्रो येन संक्राम्य शस्त्री पुत्त्रकटोपमां ।
तत: प्रधावन् प्रग्रीवमारुरुक्षु क्षितीश्वर: । निकृत्तजानुखण्डालैरालिलिङ्ग वसुन्धरां ।
तत्पृष्ठे स्वं विपन्देहं प्रहारैर्जर्जरीकृत: । टङ्कारनामा कायस्थो निरीहो वारितोऽरिभि: ।
पुनरुत्थातुकामस्य मूर्ध्नि शस्त्रावलीहृषि: । न्यपातयंस्तस्य कान्ता नीलाश्ववरणाञ्जं ।
निष्ठित्कदाचिन्नूनोऽयमविपन्नो विपन्नवत् । कस्यां मधम: मङ्गलस्यात स्वयमच्छिनत् ।
कृतं पदापहरणं यस्य सोऽहमिति ब्रुवन् । छित्त्वाङ्गुलीश्चकर्षापि रत्नाङ्गुलिमुद्रिकावलीं ।
एकपादस्थितोपानत्स्तमान्यै: शिरोरुहै: । चक्रवर्मा स ददृशे सुप्तोदीर्घभुज: क्षितौ ।
पर्यास्थया य पर्यन्ते वीरहत्या महोजस: । निर्दोषतामीषदगात्स्थितिस्थितत्वं जनान् प्रति ।
एक: शूरजानाम पृष्ठकुम्भन् द्रोहस्मृतके: । निर्गत्य भोगसेनेन वहि: क्रोधान्निपातित: ।
प्रस्थितो दयितावासं स विस्रोहवशादिव । पन्थानं पृथिवीनाथ: कान्त्या जगाह वेश्मनि ।
राज्ञ्यो द्यानं नृपतिमधुपा भोगिकच्छत्कलोलाश्वितोनामासमनकुसुमश्रेणिभि: प्रोणयन्त: ।
हा धिग्दैवानिलतरलया पात्यमाना नियत्या वल्ल्येते किमपि महसा दृष्टनष्टा भवन्ति ।
तिर्थग्म्यस्त्विगजघ्नशी परिभवं लङ्केश्वरो लब्धवान् प्रापोप्रघनपोत्तम: कुरुपति: पादाहतिं मूर्द्धनि ।
इत्थं ते बहुमानसत्परिभव: सर्व्वस्य सामान्यवस्त्को नाम भवन्महानहमिति ध्यायन् धृताहङ्कृय: ।
परासुमर्किनैस्तत्र्कु तमनाथमिव प्रभुं । मग्नं जनतासमात्कर्तुं स्वच्छन्दाहितोऽनयत् ।
भुजो कण्ठ गताल्पैक: कराभ्यां चरणौ पर: । तं भग्नग्रीवमालोलकुन्तलं रुधिरोक्षितं ।
मयूत्कारम्भं नग्रमनाथमिव पार्थिवं । राजधान्या विनिष्कृष्टं न्यधन्तां पिहकानने ।
महामरिक्षितस्ताभ:सभ्येदद्वीपभूतले । सम्राय वह्निसंस्कारं ते भूतास्तस्य चक्रिरे ।
न हतो नापि निर्दग्ध: स केनापि व्यलोक्यत । ऊर्ध्वेव गतस्त्रासु नेत्रनिर्विषयोऽभवत् ।
अतीतेन सवर्षैकचत्वारिंशतमायुषा । सप्तात्रीत्यब्दे पौषस्य शुक्लाष्टम्यां व्ययुज्यत ।

चक्रेऽथ सामिकवचोरङ्गः शोणितमण्डितः । श्मशानाश्मनि वेतालइव सिंहासने पदं । १४५
तस्यावरोहतः सिंहासनाद्योद्धुं पुरोयुधि । विक्रामन्तो बन्धुभृत्या युद्धभूमिमभूषयन् ।
तन्त्रिणौ बद्रपद्माख्यौ युद्धा तदान्वयौ चिरं । योधाश्च कद्रसूर्याद्याः सिंहद्वारेऽपतन् हताः ।
रणरङ्गनटीमत्यामिव राजा स्वहाङ्गने । सखङ्गखेटकोरङ्गः खण्डयन्नरितान् बभौ ।
द्विषन् विजयसन्देहमहितानां क्षणे क्षणे । प्रहारैः सुबहून् भित्वा स शिरेणापतद्रणे ।
राजद्रोहोचितं तस्य निहतस्यापि निग्रहं । वैशसत्यक्तमर्यादो गर्गः कोपादकारयत् । १५०
दिद्दामठान्तिकोव्यङ्गः पौरैर्भक्ताश्मवर्षिभिः । अवस्करप्रणालान्तर्मग्नवक्त्रो न्यपात्यत ।
ते गुल्फदामभिः कृष्टाः स्थाने स्थाने प्रभुद्रुहः । तत्क्षणं लोकथूत्कारपूजाकृत्योचितां दधुः ।
पलाय्य प्रययुः क्वापि मङ्खुसंमरथादयः । मरणाभ्यधिकां कश्चित्कालं सोढुं विपद्दशां ।
दृष्ट्वा पराजितं गर्गं नष्टे तदनुजे विदन् । भीमसेनोऽथ तां वार्त्तामरण्येऽन्मथोपमां ।
व्यावृत्य प्रत्यवस्थातुकामः पश्यन् पलायिनः । योधान् स्वैः सहितः कैश्चित्ततः क्वापि भयादगात् । १५५
इत्थं निहतविध्वस्तनायका द्रोग्धृसंहतिः । स्वदोर्मात्रसहायेन गर्गचन्द्रेण सा कृता ।
सत्वं साहसमिद्धिश्च नेतिहासेष्वपि क्वचित् । अश्रौषस्मादृशं यादृगस्यासीत् स प्रतापिनः ।
निशाम्प्रहरमङ्कस्य राज्यं कृत्वा स लब्धवान् । द्रोहकृच्च स्वराजाख्यां गतिं कुकृतिनामगात् ।
यशस्करकुले जन्म द्रोग्धृभिस्तैः प्रमाणितं । क्षणभङ्गुभजद्राज्यं यस्माद्वर्णटदेववत् ।
दार्वाद्दीपनकूटयन्त्रघटनैः सिंहादिसंहारिणो यान्त्याकस्मिकगर्तशैलपतनैरन्तं किरातावने ।
एकेनैव ननु प्रधावति जनः सर्वोऽपि मृत्योः पथा हन्ता हन्ति हतोऽयमेव तु वृथा कालस्य भेदग्रहः । १६०
खेदाद्दिह ललनैः घमङ्गलरवो यैर्द्यूतैः श्रूयते हीनैस्तैर्दयिताविलापपरुषस्त्वाकर्ण्यते तु क्षणे ।
योऽपि प्रज्वलितं प्रपश्यति परः स्वं प्रस्तमस्ते मृदोदृत्तं सोऽप्यवलोकयत्यहह धिक् मोहोऽयमात्मावहः ।
सायं विचिन्तितो रात्रौ फलितोऽन्यत्र वासरे । दुर्विपाकप्रदाताभूद्द्रोग्धृणां साहसद्रुमः ।
अथ सिंहासनस्यान्तः कार्याङ्गस्त्यक्तविग्रहः । गर्गः प्रक्षालितामर्षश्चक्रन्द स्वामिनं चिरं ।
तस्मिन् रुदति सर्वोऽपि पौरलोकोभयाश्रितः । संप्राप्तावसरो भूपं व्यलापोल्लोकवत्सलं ।
कारुण्यात्पतये दत्वा कोशं जीवितकामया । जयमत्या तदावादि गर्गः कपटशीलया । १६५
कुरु मे रक्षिवं भ्रातरिति सत्वभयस्तु सः । तत्प्रक्रियावचो ज्ञात्वा चिन्तितस्याप्यकल्पयत् ।
चिकुरनिचये यत्कौटिल्यं विलोचनयोश्च या । तरलतरता यत्काठिन्यं सदा कुचकुम्भयोः ।
वसति हृदि तद्यासं पिण्डीभवन्ननु ता इमा । गहनहृदया विज्ञायन्ते न कैश्चन योषितः ।
दोःशौर्यमप्यानृशंस्यो घातयन्त्योऽपि वल्लभान् । हेलया प्रविशन्त्यग्निं न स्त्रीषु प्रत्ययः क्वचित् ।
दुराधिरूढा सा यान्ती यावन्मार्गे व्यलम्बत । अयतो विस्मृता तावन्निर्गत्य प्राविशश्चिता ।
अथ तस्याश्चितारोहं कुर्वन्त्या भूषणार्थिभिः । लुण्ठ्यमानाया व्यथा गात्रेषु पप्रथे । १७०
सच्छत्रचामरे राज्ञा दह्यमाने विलोकयन् । लोकः सर्वोऽपि साक्रन्दो दग्धदृष्टिरिवाभवत् ।

सोऽचिन्त्यं तेन च तदा निन्द्येऽत्यन्तपवित्रता । सर्वैर्यद्दर्श्यमानोऽपि सोपायैश्च नृपासने ।
सुतमुच्चलदेवस्य बालमह्नि निधिस्सता । राज्येऽभिषिक्तं ते केचित्सेनान्येश्यस्य यत्नतः ।
लोकोऽपेक्ष्य केषाञ्चित्तत्त्वमालोक्य सस्मितः । भिक्षामप्यटितुं जाने नैव जानाति योग्यतां ।
राज्ञ्यां श्वेताभिधानायां सल्हराजस्य ये सुताः । सल्हणाद्यास्त्रयोऽभुवन्मध्यमे प्राक् क्षयं गते । १७५
ज्येष्ठकनिष्ठौ द्वौ शेषौ सल्हणलोठनौ । प्रच्छिन्नौ सुस्सलराजेन भयादवमठस्थितौ ।
निर्लज्जैर्निर्गताद्द्रागधम् विज्ञाय मिलितैः पुनः । तच्चसारोहसविवेरामीतः क्षत्रियाकैः ।
दृष्ट्वा राज्यार्हमप्राप्यं कच्चिज्ज्यायांस्तयोस्तदा । गर्गेण राज्ये संरम्भादभ्यषिच्यत सल्हणः ।
हा धिक् चतुर्णां यामानामन्तरेण पतिद्वयी । अदृश्यत यामे तत्रासीद् या या पुरवासिभिः ।
ये सायमुच्चलनृपं प्राह्णे रङ्गं सिषेविरे । मध्याह्ने सल्हणं प्रापुर्दृष्टास्ते राजसेवकाः । १८०
अथ लोहरकोट्टस्थः मार्गेऽर्के गलति नृपः । सुस्सलो भ्रातृमरणं श्रुत्वा दृष्टान्तमानसः ।
गर्गेण प्रहितो दूतः सकन्दं स्वं चिरयन् स्थितो । ततस्तं वीतसन्देहं चकाराक्षप्रलापिनं ।
आद्यासल्हणवृत्तान्तपर्यायां नारदेणात् कथां । गर्गदूतास्तत्वधं स्वस्याक्रान्तम् केवलं ।
अश्रद्धानस्तं शीघ्रमरिष्टकेदं सदुःखकं । तदाक्रान्ताय गर्गीयं प्राहिणोत्स सूनम् गृहात् ।
आक्रन्दमुखरो भूत्वा तां रात्रिमरुणोदये । कश्मीराभिमुखो यात्राममन्युमनोऽप्यधात् । १८५
अन्योऽथ गर्गदूतस्तं पथि संगदितोऽभ्यधात् । हतस्त्वमेव हन्ताऽस्मान्नागन्तव्यमिति ध्रुवं ।
क्षिप्रं हतेषु द्रोहेषु त्वयमप्रविष्टितेऽनुजः । हतस्तु सल्हणो राजा हत्यमागमनेन किं ।
श्रुत्वेति गर्गसन्देशं कोपात्सह्लनो नृपः । अप्रयाणैषि गौभृत्यान् विहस्येदं वचोऽब्रवीत् ।
नास्माकं पैतृकं राज्यं यदि निकृष्टगोऽनुजः । मज्ज्यायसा मया चेत्तद्भुजाभ्यामर्जितं पुनः ।
राज्यं स्वीकुर्वतोरन्यो नादातामभूत्तदा वयोः । येनाहतमिदं पूर्वं स क्रमः क गतोऽधुना । १९०
इत्युक्त्वा विरतैरेव वदद्भिः सीमप्रयाणकैः । दूतोऽस्य पार्श्वे गर्गस्य स्वीकृत्यै प्राहिणोद्ध्रुवम् ।
स काष्ठवाटं सम्प्राप सल्हणस्य हितैषिणा । निर्गत्य गर्गचन्द्रेण चक्रे कुब्जपुरे पदं ।
प्रहस्तायां निभाद्यां दूतैः कृतगतागतैः । सम्यक्स्वीकृतरसामापि गर्गो द्रोहधाम्यधीयत ।
कारामध्यगतो राजा तथापि सह्लणोन्तदा । धावेऽथ भ्रातरं गर्गाभ्यर्थं हितहिताभिधं ।
सोऽगमन् क्षणे तस्मिन्नायेय देवमोहितः । सोऽक्रमत् त्रिल्लकजाप्यधिकृत्य नृपान्तिकं । १९५
सोऽभ्यर्थी कर्णभृत्याख्यमपारोहं महीपतेः । विसृज्य गर्गं अध्यासीत् कुब्जाभूलोऽभिनोऽयतः ।
कालापेक्षामपि त्यक्त्वा हन्तुं भ्रातृद्रुहं स तं । येऽस्य समक्षमस्मिन्नथ्वरे लोकैरसञ्जनः ।
यक भ्रातृद्रुहः पार्श्वे स समायोगमे कथं । गर्गोऽपि तमुपालेभे दूतैरित्यादि संदिशन् ।
स तु मार्गात्पलाय्यायन्समभीति विलम्बकृत् । इत्यास्कन्दः सपापाद्ये तं सानुगमघातयत् ।
पतत्यं कर्णभूतिर्वीरहत्या व्यरोचत । तस्य द्वैमातुरो भ्राता तेजःसेनोऽप्यनन्तरा । २००
तेजःसेनस्तु प्रलायि नृपादेशाद्यपेक्ष्यत । मरिचो लवराजस्य तनूजोऽस्मपतेरपि ।

अवष्टम्भेन भूपोऽभूत्त्रिपथाश्वपदक्षमः । मयेनाश्चितुमशक्यं तावदासीत्तु तद्बलं ।
पुरोगोऽपि कृतः पश्चाद्योऽतीतेऽह्नि महीभुजा । स सज्जपालस्तत्पार्श्वमथादायाययौ हयान् ।
तेष्वायातेष्ववष्टम्भं यातं किञ्चिच्च तद्बलं । प्राप्तश्च गर्गसेनानीश्चतुरश्वोऽनल्पसैनिकः ।
दुधुक्षून् वीक्ष्य तानाप्तैर्नृपोऽश्वमधिरोपितः । उत्सेकगाढधीर्मर्म कङ्कटं च परिधापितः ।
गगणं शलभच्छन्नमिव कुर्वंश्चचापतत् । शराशारैरिपोर्वीरान् सर्वतोऽर्कसमन्नतिः ।
ओंकारं शरपूत्कारैः कृत्वा द्रोहस्य दुःसहाः । प्राहरत्राजकटके सर्वानुर्व्वायुधैर्द्विषः ।
हतविक्षतविध्वस्तसैन्यः साहसिको नृपः । वेगादपससारैको मध्यान्निर्गत्य वैरिणां ।
गर्जत्सिन्धुरयाश्रान्तमत्युन्नतिरलङ्घ्यत । सवाजिना तेन सेतुर्नालङ्घ्यः पक्षिणामपि ।
सज्जपालादयोऽदिक्षाः सेकुस्तमनुवर्त्तितुं । पृष्ठलग्नानिरुन्धन्तः स्थाने स्थानेऽवरोधिनः ।
वीरानकाभिधम्भोरः स स्त्रामान्निवेशनं । चिरदिष्टैः समं भृत्यैः प्रविष्टस्तत्र नेऽरिभिः ।
निरम्बरैर्निराहारैस्तिष्ठन् कतिपयैः समं । स तत्र चिरमाक्रम्य निर्भयाद्दण्डयन् खशान् ।
क्रमेण च हिमापातदुर्लङ्घाध्वनि सङ्कटे । अविपक्षो भाग्ययोगात्प्रययौ लोहरं पुनः ।
पदे पदे प्राप्तमृत्युरायुःशेषेण रक्षितः । तथाप्यासीत्स कश्मीरप्राप्तिमेव विचिन्तयन् ।
वराकं दारसैन्यघाद्दुर्गोहितहितं क्षुधा । विरुद्धधीर्वितस्तायां वहुराज्ञ्यद्रिमक्षिपत् ।
तस्मिन् प्रक्षिप्यमाणेऽप्सु क्षेमाख्यः खञ्जिपन् पुरः । दासोऽस्याक्षैःपदारोहमधःपातेऽपि लब्धवान् ।
राज्यप्रदश्चनारिग्य गर्गः प्राप्तोऽन्तिकन्ततः । प्राप सल्हणराजस्य सविशेषमधीशतां ।
स भूभृत्कान्तिविक्रान्तिहीनो राज्यमवाप्तवान् । चक्रभ्रममिवापश्यत्सर्वतो भ्राम्यमाननः ।
न सत्त्वं न च विक्रान्तिर्न कौटिल्यं न चार्जवं । न दातृता न लुब्धत्वं तस्याद्रिक्तं किमप्यभूत् ।
तद्राज्ये राजधान्यन्तर्मध्यास्केऽपि मलिम्लुचः । लोकं मुमुषुरन्याध्वसञ्चारस्य कथैव का ।
पङ्कुरप्यङ्गनाकान्तं कान्ताया यत्रात्यवाहयत् । पुमानप्यभवत्तत्र माध्वसाध्वसताधीरसौ ।
यामस्य सल्हणोऽन्वियुर्भेजे तां लोठनः श्रियं । साधारण्यं गतो राज्यभोगस्त्वभवत्तयोः ।
पुरुषान्तरविज्ञानविहीनस्य प्रमादतः । सर्वोऽपि तस्य तन्त्रस्थैर्व्यवहारो व्यहन्यत ।
स्फुरद्रोलोठनस्योजःस्वर्यसेन व्यधीयत । द्वारे तापसगोष्ठीषु योगयो विक्रमनिष्ठुरे ।
यः सुस्सलभयोच्छेदमङ्गीकुर्वंस्तदागमे । स्वमन्त्रनखजापेन सिद्धिं सम्यञ्चोऽभ्यधात् ।
जिह्मा गर्गाश्रया राजा तदप्रियमपातयत् । वहाग्रानं वितस्तायां विम्बं सोमाय डामरं ।
राजानुग्राहकौ गर्गस्तास्तान् व्यापादयन् रिपून् । हालाहां डामरान् भृगोन् दत्ताभोज्यानघातयन् ।
राज्यकिञ्चित्करे गर्गायत्तजीवितसृत्यवः । वणिग्याभ्यन्तरे चामरस्पै वा पृथवोऽपि वा ।
कदाचिल्लोहराद्दुर्गे प्रविष्टेऽथ नृपान्तिकं । चुक्षोभ नगरे लोकः सर्व्व एव भयाकुलः ।
तदा क्षुद्रचरद्वारैता प्रलान्यारोप्य सोपुथत् । क्रुध्यन् गर्गोऽयमायातो हन्तु सर्वानृपाश्रितान् ।
गर्भिणीगर्भपातिन्या तादृशा भयवार्त्तया । दिवाप्यग्रान्यसभावि जनैश्चरदवाग्निभिः ।

ततस्तिलकसिंहाद्यैरङ्कोट्टाग्रदीयत । अनवेक्ष्य नृपादेशमास्कन्दो गर्गमन्दिरे ।
देशद्यात्युक्षणः क्रुद्धो धावति स्म धृतायुधः । प्रत्यपदीक्षानजिलान् गर्गश्चक्रस्य विक्लवः ।
निर्लज्जा दिल्हभट्टारलक्ष्मकाद्यास्तु कुम्भैः । आम्यन्ताशु वाहृश्यन्त गर्गाक्रमवीथिषु ।
निषिषेध न तान्राजा प्रत्युतास्कन्ददायिनां । लोठनं कुष्ठकोलानामेषां स्मृत्यै व्यवर्तयत् ।
तेनापि योधगर्गस्य रुद्धमार्गेण मन्दिरं । न दग्धुं नापि निर्दग्धुं पारितं हस्तवर्तिना ।
धानुष्ककेशवोनाम मठाग्नीलोठिकामठे । समाधत्तेव नाराचैस्तद्योधान् घातयन् परं ।
प्रकाशेन समं राजलोके विरलतां गते । साथं सानुचरो गर्गो हयारूढो विनिर्ययौ ।
समरैरप्रतिहतो निनाय लोहरं व्रजन् । मल्लीजःसुय्यमल्लप्रमासोमं त्रिपुरेश्वरे ।
तापसेन किमेतेनेत्युक्त्वान्येद्युर्मुमोच तं । तं सुस्सलेऽपि विधुरे नृपतिं नोदपाटयत् ।
क्षणे क्षणेऽभवद्देशस्ततःप्रभृति सर्वतः । गर्गागमनसम्भ्रान्तोऽधारार्गलितमन्दिरः ।
अथार्तस्य महीभर्तुर्गर्गमन्त्रानभिच्छतः । मल्लसमः सहेलोऽभूल्लोहरे दुत्यमाचरन् ।
तेनाङ्गीकारितो गर्गः कर्तुं स्वकन्यकार्पणं । भृत्यास्तु तेन सम्बन्धं नैच्छन् भूतस्य भूपतेः ।
ततः सुस्सलदेवेन सह सन्धिं निबद्धवान् । पश्चात्सम्प्रार्थ्यमानोऽपि सम्बन्धं न व्यधत्त सः ।
मण्डले विग्रराकृतमेवं याते नृपोऽब्रवीत् । सङ्गं रंसरथं लोनरयक्षामादितास्सुरैः ।
तानग्निकणसन्ध्यादिप्रवेशैरिव दुर्जनः । अत्यकानसुभिर्घोरामवस्थामन्ववीभवत् ।
भोगसेनाङ्गनामज्ञामनुमेने स्वयं नृपः । अनुमन्तुं पतिं स्वच्छं वसन्तीं साधु तद्व्यधात् ।
तादृग्दृष्ट्वापि वैक्लव्यं प्रहितेन तदन्तरे । प्रसिन्ये दिल्हभट्टारो रसदानेन भूभुजा ।
न राजबीजी वोषाणडविक्रमो वा बभूव यः । प्रमितो गुडदण्डेन यस्तथा तेन पापिना ।
तं या निनिन्दानिष्पणपाटवं तत्सुसुतादा । तस्या वह्निप्रवेशेन सिद्धं मानवतीव्रतं ।
सोऽन्योऽपि राज्यकालोऽभूद्देवमातृकदृश्मदः । दीर्घव्यपादृश्यमानदीर्घदुःखप्रसवभः ।
कालवित् सुस्सलो गर्गाद्बद्धसन्धिरपि भ्रमन् । न्ययुङ्क्त ते सप्तपालं काश्मीरीश्चायभाजनः ।
द्वारेण सह दत्तार्थो लक्ष्मकः सत्त्वभूभुजा । वराहमूलं सम्प्राप कथञ्चित्प्रस्थितं भजन् ।
गर्गः स्वरम्भवस्कन्दं पश्चादभ्येत्य नाशयन् । वराहमूलेन समं तस्य सैन्यमलुण्ठयत् ।
विवृद्धो म तु तद्योधैर्हतैश्च परिवव्रजे । अदिव्येर्मेदिनी दिव्यैर्देवैर्सुरषां गणः ।
नायकैर्गलितैः शुद्धहस्तैः सर्वाङ्गजैर्भवी । पतितैश्च्यापचूडाद्यैर्भूषिता मौक्तिकैरिव ।
आगच्छता स्वकभीतिं सप्तपालेन लक्ष्मकः । निराश्रयः सम्प्रपेदे पार्श्वं सुस्सलभूपतेः ।
सोऽथ भूभृत्सप्तपाले दूरं काश्मरिपौ गते । आजगामान्तिकं प्राप्तैः प्रेरितः पौरडामरैः ।
सन्धिं तव विधास्यामि माद्द्यै सुस्सलभूभुजा । इत्युक्त्वा स्वजनं प्रायान्तदभ्यर्णं सहेलकः ।
काङ्क्षिताभ्युदयं पौरैः शातकैरिव वारिदं । चक्रिश्रियवाजवर्ग्यं सर्वे एवोपलालनं ।
गर्गोऽस्य स्वहितो कुड्डाभिधानाया तरङ्गिकं । कन्यकादेवमादाय परिणेतुमुपाययौ ।

उपयेमे स्वयं राजा राजलक्ष्म्यभिधां तयोः । गुणलेखां स्नुषात्वेन स्वीचक्रे तदवीयसीं ।
सल्हणे सानुजेऽभ्येत्य सज्जपालेन वेष्टिते । राजापि राजसद्मनः सिंहद्वारं समासदत् ।
सात्वाविरोधिभृत्येन द्वारमेकेन पातितं । अभुक्तोषं तमप्राप्य सार्द्धं वैरिमनोरथैः ।
ससैन्ये गलितद्वारराजवेश्मस्थिते रिपौ । गर्गात्मजद्विसङ्घाशोषकितं धौतलं बलं । ४६५
गर्गे विनीर्णकल्येऽपि राजसैन्यमविश्वसत् । तस्थौ स्वानर्थमित्येव तृणबन्धेऽपि शङ्कितं ।
अस्ताभिलाषिणि दिने तादृक्सम्पदत बले । खेदाद्द्रवति सापि दुर्भेदोकस्थितान्रिपून् ।
प्रविश्य धामनिर्भुग्नकवाटेन तमोरिणा । द्वारं विहत्याङ्गमध्ये सज्जपालोऽप्यधोद्रुमं ।
तस्य निःसृत्य पातङ्गीं वृत्तिं भूधरशिखरे । अनुप्रवेशं विदधे यदा तिलकसंज्ञकाभिधः ।
द्दद्दानघने काष्ठवाटसङ्कटविक्रमे । यस्तस्य सदृशो योधः प्रतिबिम्ब इवाभवत् । ४७०
स कथंत्र स मठाधीशस्तमनुसस्रतुः । श्रीनेयमाहती पार्थमिव प्रार्थितसैन्धवं ।
निर्गत्य मण्डपाक्षप्रहारैस्तैः कथञ्चन । विवृते प्राङ्गनद्वारे धीरो राजाविशत् स्वयं ।
निर्विभागे वर्तमाने सङ्कुले सैन्ययोर्द्वयोः । प्राङ्गने प्रमथं प्रापुर्भूयांसस्तत्र शस्त्रिणः ।
सचिवः सल्हराजस्य पलंगग्रामजो द्विजः । आजौ प्रापाङ्कको नाम स्वर्गीसम्भोगभागितां ।
कायस्थेनापि रुद्रेण लब्धा गञ्जाधिकारितां । स्वामिप्रसादः साफल्यं निन्ये त्यक्ता तनुं रणे । ४७५
सायं वनस्पतिर्लीनैः स्वर्गेश्वासाक्षिता यथा । सालिन प्रविष्टे प्राङ्गोनलिःशब्दविहगोऽभवत् ।
आयोधनोर्व्वी वाचाला सके चित्रार्पितेव सा । तथा सुस्सलभूपेन तुरुष्केन तर्जिता ।
अनाहतोऽङ्गनाम्नःस्त्रे तस्मिन् सिंहासने ध्वनिः । सुस्सलो जयतीत्येव ढक्कावाद्यस्य शुश्रुवे ।
मल्लराजसदृक्षे तादृक्सान्यस्याप्युदपद्यत । अगातां तत्र वैक्लव्यं यादृक् सल्हणलोठनौ ।
आबद्धकवचावस्थाकण्ठावालिङ्ग्य सुस्सलः । बालौ युवामिति वदन् धूर्त्तोऽत्याजयदायुधं । ४८०
आदिश्य मण्डपेऽन्यस्मिन् सङ्ग्रहं स्थितिं तयोः । प्राप्तराज्यस्ततो राजा विवेशास्थानमण्डपं ।
व्यहानांस्तु गोमासान् भुक्तराज्यं बबन्ध तं । सितस्य सोऽष्टाशीतेऽब्दे राधस्य सितषेऽहनि ।
तेन सिंहासने क्रान्ते भास्वतेव नभस्तले । क्षणाद्वेवाखिलो लोकः क्षोभमब्धिरिवात्यजत् ।
त्रिकालग्रस्तःसन्दोहावेक्षणक्षोभतः सदा । व्याधलोके व्यालसक्तो मृगराजइवाभवत् ।
आह्लादुकः कुलच्छेदमभिप्रायान्निवय कुर्वता । न तेन नीतिनिष्ठेन रिपवोऽप्यवशेषिताः । ४८५
जनस्य वीक्ष्य दौर्जन्यमधृष्टाकारतां वदन् । स कार्य्यापेक्षयाऽप्यासीन्न कार्य्याहितमार्द्दवः ।
वस्तुतस्त्वार्द्रहृदयः क्रूरन्दमयितुं जनं । अवाप्तवं तन्नोमत्वाच्छिनिं व्यालइवादधे ।
कालवित्त्व मलत्यागी प्रगल्भः प्रतिभाववान् । इङ्गितज्ञो दीर्घदृष्टिः सर्वान्यो न कोऽप्यभूत् ।
अधिकः कोऽपि कोऽप्यूनः कोऽपि तस्य सतोगुणः । दोषोऽथ वा पूर्वभस्त्र स्वभावेष्वोऽप्यदृश्यत ।
अन्यकारि समानेऽपि कोऽपि तत्पूर्व्वजन्मनः । कौपेन विषमाक्रान्तं सहीपेन तु सारधं । ४९०
न बभूव स वेदादौ साम्यतोऽनुचितं पुनः । स्थितिभिरभवासेदे नाक्षेकमनुजीविनां ।

नैच्छत्स द्वन्द्वयुद्धादि सन्धानैर्मानिनां वधं । तस्मिन् प्रमादान्निर्व्यूढे तदीयन्न कराकुलः ।
वाक्पारुष्यं नृपस्यासीदाशयस्यातिदुःसहं । तस्य तु प्रणयप्रायं हिंसाद्याबाधवर्जितं ।
तस्यार्थग्रहणोत्पादो भृत्यानां स्म सम्पदां । त्यागो विषयकालादिनैयत्यानुमितोऽभवत् ।
नवकर्मास्ववाक्कर्मप्रिये तस्मिन् दरिद्रतां । तत्यजुः कारवो वाजिविक्रेतारश्च दैशिकाः ।
दुःसहव्ययमनोत्पत्तौ जिगीषोः प्रशमैषिणः । तस्याभोदपरित्यागं न किञ्चिदनुवर्षिणः ।
तस्येन्द्रादप्यभूद्भूरिपरार्द्ध्यार्घ्यकदायिनः । यथा नृपस्य ऽऽऽभे तथा नान्यस्य कस्यचित् ।
यथा प्रागुच्चलो राजा सुप्रापः प्रियसेवकः । स तथा सेवकैरासीद्भुवा दुर्लभदर्शनः ।
सोच्चलादपरस्यासीद्व्यसनं हयवाहने । नान्यस्य सुस्सलनृपाद्राज्ये तत्र च पप्रथे ।
शममुत्पन्नमुत्पन्नं निन्ये दुर्भिक्षमुच्चलः । राज्ये सुस्सलदेवस्य न तत् क्वाप्यदृश्यत ।
किमन्यदर्थिनः सोऽभूद्यशादधिको गुणैः । त्यक्ता त्यागार्थनैस्पृश्यमप्राप्त्वापि केवलं ।
श्रोत्रैः पानको गर्गो यं राज्ये कर्तुमैहत । सहसा मल्लकोष्ठेन निरावास्यत स क्रुधा ।
तस्मिन् भट्टावकाशाख्ये ग्रामनामा तदात्मजः । काम्बलोत्कोपदप्तके डामरैः सह चाक्रिकं ।
समस्य मल्लचन्द्रं पितृव्येणार्थितं श्रियः । प्रसह्य तत्र गर्गोऽपि प्रातिकूल्यमदर्शयत् ।
प्रहितानां सरोषेण तृणानामिव शस्त्रिणां । गर्गदावाग्निदग्धानां निःसङ्ख्यानामभूत् क्षयः ।
गर्गश्यालोऽपि विजयः स देवसरसोद्भवः । प्रातिलोम्येन नृपतिसैन्यानां कदनं व्यधात् ।
राज्यप्राप्तेर्मासमात्रे दिनैरभ्यधिके गते । तेनातिपक्षेण राज्ञोऽभूद्धीरस्याकुलं मनः ।
सुरेश्वर्यन्तरे शोर्व्यां वितस्तासिन्धुसङ्गमाः । गर्गेण राजसैन्यानां कृताः कदनकारिणः ।
सेनाम तुमुलेऽमात्यौ शृङ्गारकपिलौ हतौ । कष्टमुद्रकनामानौ तन्त्रिणौ च सहोदरौ ।
निहतानन्नमतष्टमश्रमूर्ध्वसंस्थितान् । तादृशानपि निक्षेप्तुं नाभूत्कस्यापि पाटवं ।
चर्मसिन्धुः कम्पनेशो भूभर्तुर्मातुलात्मजः । विजयेन हतानेको विदधे विजयेश्वरे ।
पुत्रो मल्लराजस्य निहतो राजन्यवंशजः । तत्र तिम्बाकरमुखास्तन्त्रिणश्च प्रसिस्थिरे ।
राजानीके सल्लपालः प्रवीरप्रवरोऽभवत् । भूरिसैन्येन गर्गेण नाल्पसैन्योऽपि योजितः ।
असंख्यविजयश्चैव लक्ष्मकाद्यैर्विसर्जितैः । धीरो राजा बलं भग्नं स्वयं गर्गाभिमुखं ययौ ।
सोऽभिषिच्य गर्गेण हतान् योधान्सहायीकृतान् बहून् । निरदाहयदन्येद्युर्मत्रिसैः सितासिभिः ।
शक्तिना भुभुजा गर्गः पीड्यमानः शनैः शनैः । ततः स्वकमतोद्गम्य फलाशाभिमुखोऽभवत् ।
स तत्र रत्नवर्षाख्यं गिरिदुर्गं समाश्रितः । चूलाख्योऽनुचरैस्त्यक्तो नृपेणारादवेक्षत ।
चन्द्राकृतेन तत्रापि सल्लपालेन वेष्टितः । चरणौ शरणीचक्रे राज्ञो दत्वोच्चलात्मजं ।
चाक्रिकस्थे नृपे कर्णकाष्ठजं मल्लकोष्ठकं । विहर्तुं हठवत्याऽऽ गर्गो विश्वासमाययौ ।
उत्कोतप्रणतिकस्य सेष्टेषु विजयादिषु । शमितोपप्लवो राजा निर्वेश समरं शनैः ।
गत्वाथ लोहरेऽन्यस्य सङ्घा सल्हणलोठनौ । स कारासोमपालाद्यैरसमं सेवितो नृपैः ।

भूयः प्रविष्टः कश्मीरान् सेव्यः सर्व्वातिशायिभिः । गर्गं प्रसादैरनयत्प्रवृद्धिमधिकाधिकैः ।
ग्रीष्मार्कप्रतिमे तस्मिन् ह्लादिनावनुचक्रतुः । महादेवी कुमारस्य द्रुमच्छायावनानिलौ ।
डामरौ देवसरसोद्भवौ विजयगोचिणौ । दर्पट्टिकस्तथा सन्मटिक्कौ वेलां प्रचक्रतुः ।
सानाथ्यकाङ्क्षिणौ पार्थिवेऽस्य प्रविशतः पुरः । लोकपुण्ये तस्थतुस्तौ क्रन्दद्भिः खाशगैः समं । ५२५
विजये गर्गसम्बन्धात्सदाशङ्की महीपतिः । सदाचारं परित्यज्य वैरिभिस्तावनाशयत् ।
तौ मानिनश्च तद्भृत्याः कष्टकस्वास्ततोऽवधुः । साहसं सुमहत्तैन्यं प्रहरन्तो महीपतेः ।
श्वपाके भोगदेवाख्यः कृपाण्या प्राहरन्नृपं । धीरो गज्जकनामा च करवालेन पृष्ठतः ।
सावशेषतया भूपस्यायुषोऽमोघतां ययुः । द्विषत्प्रहृतयो वाहतुरगी तु व्यपद्यत ।
नृपत्यान्तरयोर्दर्गप्रभृतिं वाणवंशजः । निहतश्च प्रकाशसिंहः सादी समन्यकः । ५३०
सैनिकैर्मैर्द्वहद्विकभोगदेवादयो हताः । सन्मटिकस्तु निस्तीर्णो हेतुर्भाविनि विप्लवे ।
शूले व्यापादिता गज्जकादयो द्रोहधर्षिताः । सन्देहितासुरित्यासीद्राजा गर्गानुकूल्यभाक् ।
न भवत्यरिपातेऽपि प्रमथः समयं विना । प्रसूनमप्यसून् हन्ति जन्तोः प्राप्तावधेः पुनः ।
ज्वालाभिरौर्व्वदहनस्य पयोधिमध्ये न म्लानतामपि हि यानि मुहुः प्रयान्ति ।
तान्येव यान्ति विलयं किल मौक्तिकानि कान्ताकुचेषु युवभावभुवोष्मणापि ।
प्राक्सेवामपि निस्तत्य परेलोकासहिष्णुना । मल्हणाख्यक्षपालाद्या निरावास्यन्त भूभुजा । ५३५
सम्बन्धी कार्कश्यानो यशोराजाभिधस्ततः । सहसमङ्गलाभ्यर्णे राज्ञा निर्वासितो ययौ ।
तमन्यांश्च विनिर्य्यातान् देशाद्रुद्धमहर्द्धिमान् । रैल्हणस्यप्रतिष्ठः स राज्ञः प्रत्यभियोगितां ।
तत्पुत्रः कान्दमार्गेण विविशुः स्वापनैनिकैः । यशोराजे च ते ग्रामः प्रत्याहृत्य ययौ भयात् ।
अथान्येष्वपि भृत्येषु राज्ञा निर्व्वासितेषु सः । मिलितेषु प्रथां यावत् ययावदुपलब्धवान् ।
उपरागे नवे सन्ध्ये पर्व्वतीयास्त्रयो नृपाः । चाम्पेयो जासटो वज्रधरो वल्लापुराधिपः । ५४०
राजा कल्हजपालश्च वर्तुलानामधीश्वरः । युवराजो त्रिगर्तीर्वल्लापुरमेरन्ध्रयोः ।
कल्ह आनन्दराजश्च पञ्च भाटिताः कथित् । प्रस्थानार्थं कृतपणाः कुरुक्षेत्रमुपागताः ।
आसमत्याहृतं तावदभ्येत्य नरवर्ष्मणः । प्रापुर्भिक्षाचरम्मेन दत्तपाथेयकाञ्चनं ।
कुलकं ॥ स जासटेन सम्बन्धिस्नेहादिहितसत्कृतिः । नीतोऽन्येद्युः प्रथां भूपैर्वल्लापुरमथाचरो ।
देशादिनिर्गैर्व्विम्बप्रमुखैर्वर्द्धितप्रथे । तस्मिन् प्राप्ते सहसस्य प्रतिष्ठा लघुतामगात् । ५४५
आज्ञेयं हर्षदेवस्य क एते राज्य इत्यथ । उक्ता त्यक्ता सहस्रादीस्तमेवाभिश्रयज्जनाः ।
कृतप्रभावमुत्सृज्य सम्बन्धिस्नेहमोहितः । दर्पको राजपुत्रस्तं राज्ञा निर्व्वासितोऽप्यगात् ।
पुत्रः कुमारपालस्य तत्पितुर्मातुलस्य सः । वृद्धिं सुखलदेवेन पुरा निन्ये हि पुत्रवत् ।
प्रेरितो युवराजेन जासटेन च कल्यकं । वल्लापुरेशः मदधी भिक्षोऽस्य सपक्षकः ।
तद्देशठक्कुरो भूपान् साट्याखिलांस्ततः । तमैच्छद्रूपपालाख्यः कर्तुं पैतामहे पदे । ५५०

तां वार्तां श्रुतवाञ्जाजा चावहासीद्भयाकुलः । गवयालो हतस्तावद्राजवंशे स्वरूपना वशी ।
चक्रके तान् प्रतिगतो योद्धुं प्रधनमध्यगः । भिक्षाचरश्चमूधुर्यो दर्पकोऽपि व्यपद्यत ।
तेन प्रधननाम्ना ततो भिक्षाचरो ययौ । अकिञ्चित्करतां मेघद्वावग्रहवाग्निः ।
आयमत्यां प्रयातायां क्षणं पार्थेक्काश्रमे । मल्लुरोऽपि ययौ तत्र शनैर्मन्त्रोपचारितः ।
चतुःपञ्चानि वर्षाणि तिष्ठन् जामटमन्दिरे । पाञ्चाल्याद्गमनार्थं स ततः क्षेमालयमासदत् ।
ठक्कुरो देवपालोऽथ चन्द्रभागातटाश्रयः । दत्वा सुतां धन्विकाख्यां तं निनाय निजान्तिकं ।
प्रासमोयकोत्रसंस्तत्र कञ्चित्कालं भयोज्झितः । स राजश्रीं दैन्येन शमेन च तत्यजे ।
तदन्तरे साहसिकः प्रायः साहसिकस्पदः । गतागतानि कुर्वाणः संरम्भमनयन्नृपं ।
स सिन्धुपथमार्गेण विविक्षुर्विग्रहोन्मुखः । तैरेव मन्त्रिभिर्भर्तुर्बद्धा पापैः समर्पितः ।
तयोस्त्विषि परं सत्वं मल्लपालस्य पप्रथे । छिन्नोऽपि द्रोहविमुखो यत्स देशान्तरं ययौ ।
तस्मिन् पुरे कुलीने च किं वाच्यं स दिगन्तरे । शौर्येण च यशोराजः पप्रथे बलदङ्कुतं ।
अथ राजा शिवास्याद्यान्सहीनादीनपाहसमान् । सर्वाधिकारे विदधे कायस्थं गौरकाभिधं ।
स तापसस्य सम्बन्धी कथञ्चिद्विजयेश्वरे । सेवया लोहरस्यास्य तस्य वाल्लभ्यमाययौ ।
शमिते पूर्वकायस्थवर्गे तेन ततः क्रमात् । नीतः सर्वाधिकारित्वं सोऽन्यासैश्च स्थितिं व्यधात् ।
अप्रेक्षकर्मस्थानेभ्यो हृत्वा राजोपजीविनां । निर्व्याजकोषं भरणं तेनाकार्य्यनिशं प्रभोः ।
वर्दिता पापिनस्तस्य नाम्नापि क्रूरता जनैः । मधुरिक्तो विषस्येव शक्तिः प्राणापहारिणी ।
न्यधात्तत्पण्यविषं स पूर्वैस्सञ्चितनाशकृत् । विरुद्धे नृपतिः कोषे छिन्ने छिन्नमिवाम्बुदः ।
कोशः क्षपणविक्षेन प्रतिष्ठेन ति दूषितः । भुज्यते भूमिपालानां तस्करैरथवाग्निभिः ।
लोभाभ्यासेन भूपोऽपि सञ्चितं कोशमत्यहं । व्यासे स्म लोहरगिरौ प्रदिग्धस्वर्णसंपदः ।
गौरकार्थिभिर्भूपचक्रकायैर्नियोगिभिः । विधीयते स्म निःसारा महोत्पातैरिव क्षितिः ।
क्षुवलत्रापतो ग्रामे मुद्राकल्पविलोपवैः । अथावर्तं पुनर्लोकं व्याधा इव नियोगिनः ।
प्रसक्तकलशख्याते तद्धाटनमयः परं । कायस्थकनकोनाम सः ध्यानकृत सम्पदं ।
नानादिगन्तरायातो दुर्भिक्षपतितो जनः । येनाविच्छिन्नसत्रेण ग्रासव्यापद्यधीयत ।
सञ्जातमुक्तस्थात्म्ये येषां तत्परीक्षणं । स एव चक्रिरे राज्ञा प्रसन्नेनाधिकारिणः ।
द्वारे तिलकसिंहस्य तादृशेन व्यधीयत । राजस्थाने च जनकः कलशस्य सहोदरः ।
प्रतापैर्नृपतेस्तोत्रैः करमाक्रान्तमण्डलः । जितान् द्वाराधिपः सोऽपि चकार रणाधिपान् ।
काकवंश्यस्तु तिलकः क्ष्माभृतां दलकम्पनः । निन्ये प्रकम्पमहितान् प्रकम्पन इव द्रुमान् ।
यात्स्वव्यभूता श्रेष्ठराजस्थानाधिकारिणा । नृपाः प्रतापैरहिताः सज्जकेनापि निर्जिताः ।
काकवंशाख्यात्तवाप्तराजद्वारेण धीमता । अतुलेनाकस्मात्तेनाम्बवापिष्टेन मन्त्रिताः ।
एवं कार्यदृशां त्यक्ता गुणापेक्षेण मन्त्रिणः । कुर्वतो राज्यचर्चां तेन कश्चित्कालोऽत्यवाह्यत ।

वितस्तापुलिने सोऽथ कर्त्तुं प्रारभतोत्सवं । स्वश्च श्वश्रूः स्वपत्न्याश्च माता सुरस्सदेव्यभूं ।
उत्पातवह्निना दग्धो निःसंख्यधनदायिना । तेन दिद्दाविहारोऽपि नूतनत्वमनीयत ।
पुरीमट्टिलिकां जातु स प्रयातोऽग्निकर्शितः । स्नातैः प्रैष्यत कल्याणेगर्गो भेदाय भूपतिः ।
गार्गैः कल्याणचन्द्राख्यस्ताननिक्रम्य हि स्फुरन् । मृगयादिच्छले तेषामसूत्रामुदपादयत् ।
सर्वाभ्यधिकसामर्थ्यं तस्मिन्नाप्तं निवेद्य ते । नित्योपजापनैर्गर्गे विक्रियामनयन्नृपं । १८५
बद्धा त्वं लोहरे भर्त्तुं दित्सति त्वामित्यथ । गर्गः सह्ये स्वेन राज्ञा चैकेन बोधितः ।
ततः स ससुतस्तत्र पलाय्य स्वभुवं ययौ । दिनैर्भूपोऽपि संप्राप्तः प्रविवेश स्वमण्डलं ।
अन्योन्यशङ्कया भेदं यातयो राजगर्गयोः । चाक्रिकैः कृतसञ्चारैर्वैरं प्रौढिमनीयत ।
श्यालं गर्गस्य विजयं सेवमेवत्रवर्द्धनः । समीपात्तस्य राजा पश्चात्तापेन पस्पृशे ।
कारायां गर्गस्य चर्यस्तेन पूर्वं न्यधीयत । स मल्लकोष्ठकस्तस्मिन् कालेऽमुच्यत बन्धनात् । १९०
निबन्धे येन सोऽबद्ध डामरैरपरैः समं । तद्द्वारविश्वासामर्शो निनाय स ततां नृपः ।
सैन्यैर्युद्धेषु निर्याते राजसैन्येऽथ पूर्ववत् । गर्गेण कदनं चक्रे योधानाममरेश्वरे ।
तत्र सर्वातिशायिन्या वीरतृष्णया नृपाश्रितः । समालोडामरः प्राप प्रथां पृथ्वीहरः परां ।
रणे द्वारपतेर्गर्गनिर्जितस्य पलायने । शौर्यं तिलकसिंहस्य प्राप सर्वोपहास्यतां ।
हतशेषाः चताः शस्त्रवस्त्रादि त्याजिता भटाः । तदीया गर्गचक्रेण कारगारात् केऽपि रक्षिताः । १९५
वह्निसात्क्रियमाणेषु वीरदेहेषु सर्वतः । राजसैन्ये चिताग्नीनां गणना कापि नाभवत् ।
हृष्टसैन्येन राज्ञाथ गर्गो निर्दग्धमन्दिरः । सम्प्राप्य लोहरं प्रायाद्गिरिदुर्गावनाभिधं ।
गिरिमूर्ध्नापविष्टस्य भूपतेः सैनिकैः समं । तेषु तेष्वकरोन्नित्यं गिरिमार्गेषु सङ्गरं ।
कूटयुद्धैर्नृपानीकं प्रतिरात्र्युपतापयन् । रणे चैलोक्यराजादिप्रमुखान्सैनिकांऽवधीत् ।
फाल्गुने हिमसञ्चारभीमे परिमितानुगः । स धीरो राज्यपि रिपौ न धैर्येण व्ययुज्यत । २००
धैर्यवान् काकवंश्यस्तु तिलकः कम्पनापतिः । परं सिद्धरिपुस्कन्धं सोऽभूत् प्रधावितुं ।
पीडितस्तेन सम्प्रेष्य स्वभार्यां तनयान्तिकं । निन्येऽनुकूलतां भूपं प्रसादाच्छादितक्रुधं ।
गूढमन्युर्नृपः सन्धिं बद्ध्वा प्रचलितस्ततः । तं मल्लकोष्ठकं हर्तुं निनाय न पुनः क्षमं ।
सेहेऽथ लोहरे हिमाक्रान्तविग्रहे नृपे । स मल्लकोष्टकाख्यस्पर्धां नीचविमानतां ।
तन्मध्ये नृपतिर्गूढं विभेदं तद्बलं नयन् । तदीयानकरोत्कृत्यान् कर्णाग्रोतहितावहान् । २०५
स खिन्नो नीचदायादस्वामी चिकवाय तैः । प्रेरितः पार्थिवाभ्यासं महारतनयोऽविशत् ।
स्वामप्रहृष्टः पार्श्वस्थ्यानद्रोह्युपरिस्थितः । अथैकदा तमाश्लिष्य स्वसमत्याभयन्नृपः ।
कुर्यादाद्यामवष्टब्धे कोऽन्यः पौरुषगर्वितः । आविपद्यमपि सोऽपि यत् क्षीणं भीरवयो ।
उत्खातरोपितनृपः क्व नु सोऽभिमानः कार्पण्यभागितरलोकसमा क्व वृत्तिः ।
यदा वंशं नटयति प्रकटं विधातुरित्येव वञ्चनगुणं परिचिन्त्य अन्तुं ।

अशकन् युधि ये द्रष्टुमपि तं नाश्यते शठाः । केऽपि राजप्रिया वाह्य यन्त्रिबद्धा तथा व्यधुः ।
सोमङ्गाममठाभ्यर्णमन्दिरस्था नृपे स्वयं । सङ्ग्रामोपस्थिते युद्धात्कल्याणाद्या व्यरंसिषुः ।
जीवन्तं पितरं श्रुत्वा विदेशे गर्गनन्दनः । मान्यमानः स्वयं राज्ञा लक्ष्याङ्कन्तं समार्पयत् ।
गर्गे सदारतनयो राजाकस्येव भूभुजा । उपायप्र्येन दाक्षिण्याद्गोभोगैर्निजोचितैः ।
गार्गिः पलाय्य यातोऽपि चतुष्कं निजमन्दिरात् । अवर्णभाजा कर्णेन दृष्ट्वा राज्ञः समर्पितः ।
कृतघ्नप्रकोपस्य प्रमादस्य महीभुजः । अतः शुद्धिविहीनस्य हीनत्वेव न निश्चयः ।
दरद्राज्ये मणिधरे दिदृक्षायागते नृपः । तत्संगमाय निर्याते गर्गं भृत्यैरघातयत् ।
द्विघास्मामाम सोऽनुभूतकारागारस्थितिर्निशि । सप्तात्त्रिभिः सुतैः कण्ठबद्धरज्जुर्व्यशात्यत ।
निहतं विस्मृत्यानिन्ये यथैव स नृपाङ्कुशैः । तथैव कण्ठबद्धात्मा सपुत्रोऽक्षिप्यताम्भसि ।
तं चतुर्नवते वर्षे हत्वा भाद्रपदे नृपः । सुखेच्छुः प्रत्युत प्राप दुःखमुद्भूतविप्लवः ।
वर्के कालिन्दराधीशे महादेव्याश्च मातरि । मल्लाभिधायां शान्तायां स ततोऽभूत्सुदुःखितः ।
तन्मध्ये नागपालाख्यः सोमपालस्य सोदरः । तेन प्रतापपालाख्ये हते द्वैमातुरेऽग्रजे ।
शङ्कितस्त्रिशङ्कारं हत्वामात्यं पलायितः । त्यक्तस्वदेशः शरणं ययौ सुस्सलभूभुजं ।
क्रुद्धः स कारणाकृत्स्नसम्पणार्थं वशवर्तिनः । चटकनसोमपालस्य निरीक्षकायाभिषेणनं ।
निश्चित्य सन्धीपायानामसाध्यं विधुरं नृपं । स भिक्षाचरमानिन्ये तस्य वक्तापराद्धिपुं ।
निशम्य सीलदायादं तं प्रकोपाकुलो नृपः । दत्तास्कन्दोऽविशत्सोमनेजा राजपुरीं ततः ।
दग्ध्वा राज्ये नागपालं सोमपाले पलायिते । सप्त मासान्स तत्रासीत्तांस्तान् संत्रासयन्रिपून् ।
राज्ञां वज्रधरादीनां राज्ञा वज्रधरोपमः । सेवावसरदानेन प्रसादविवशोऽभवत् ।
भ्रमतां चन्द्रभागादिसरित्तीरेषु सर्वतः । तान् सैन्यानां मुखमपि द्रष्टुं शेकुर्न वैरिणः ।
अग्रयास्राभवत्तस्य तिलकः कम्पनापतिः । दुर्वोढरो डामरस्य मार्गरक्षणदीक्षितः ।
धार्मिको नृपतिस्तत्रपुरीं देवसरस्याय सः । मण्डलं द्विषताक्रान्तम् प्रपेदे सौलिके फलं ।
तस्येन्द्रविभवस्यान्यसामर्थ्यं वर्ण्यते कियत् । आयव्यावस्थयाभोऽपि सैन्यस्य स्वमण्डलात् ।
तत्र प्रसक्तौ तत्रासीभवत्तत्र जनवल्लभः । दूरस्थस्यानयद्वृद्धिं गौरकस्योपरि क्रुधं ।
राजगृह्ये स्वयं राज्ञा स्थापितः स स्वमण्डले । स्थाने पैशुन्यात्तुच्छबुद्धिना निखिलार्थहृत् ।
ततस्तस्येन तिलकं स निरुद्ध्य नगराधिपं । सर्वोत्तलकक्षिकस्य तद्भ्रातुरदवेजयत् ।
स्वाधिकारं समासाद्य क्रुद्धा पर्णोत्ससंभवं । चकम्पाधिपमानन्दाभिधं द्वाराधिपं व्यधात् ।
सोमपालादयः शाढास्रादा प्रकृतयोऽभवन् । राजससत्पास्थितस्यापि न याः सविधमाययुः ।
स पञ्चनवते वर्षे वैशाखेऽथ स्वमण्डलं । प्राविशन्नागपालोऽपि राजभ्रष्टत्वमन्वगात् ।
दुःसहातङ्कदृतेन लोभेन क्षोभतस्ततः । चरणवत्स वासत्वाननयद्वाक्पतां व्ययं ।
निवार्य गौरकं कार्यात्कार्पिणस्तत्समाश्रितान् । तत्र दण्डयतः सर्वे विरागं मन्त्रिणो ययुः ।

अकाण्डव्यवहारेषु स विपर्य्यासितेष्वभूत् । अवसन्नधनो गाढमप्रौढ्यात्स्वमन्त्रिणां ।
सौवर्णीरिष्टिकाः कृत्वा प्राहिणोत् लोहरान्तरे । काञ्चनाद्रिप्रतीकाशान् स्वर्णराशीनढौकयत् ।
अथ दण्डयितुं गर्गं भृत्यान् दण्डाधिकारिणं । लहरेऽकृत गर्गस्य मन्त्रिणं गज्जकाभिधं ।
तं दण्डभीतैर्गर्गस्य सेवकैरास्थितस्ततः । विश्वस्तमवधीत् क्रुध्यन् ख्यातनामा मल्लकोष्ठकः ।
लहरे विद्रुते राजा द्वैमातुरमथाग्रजं । मल्लकोष्ठस्यार्जुनाख्यं बबन्ध सविधस्थितं ।
हस्तत्र यशश्चन्द्रस्य पुत्रं गोविन्दमप्यसौ । बद्धा व्यधाद्धिन्दकाख्यं तस्य तद्भ्रातरं हितं ।
पूर्व्ववैरं स्मरन् सूर्य्यं सपुत्रं तं परांस्तथा । बबन्धानन्दचन्द्रादीन्नीत्युल्लङ्घनमाचरन् ।
निर्गते लहरं मल्लकोष्ठके विद्रुते ततः । आरोप्यार्जुनकोष्ठं तं शूले कोपाद्व्यपादयत् ।
निवेश्य सैन्यं तत्राथ प्रविष्टस्य पुरं ययुः । डामरा निखिलास्तस्य वैरं विश्वस्तघातिनः ।
क्रुध्यन् पृथ्वीहरायापि कृतमेवाथ मन्त्रिभिः । आदिष्टैः कम्पनेशाद्यैरवस्कन्दमदापयत् ।
कथञ्चित्स तु निस्तीर्णो जयन्तीविषयोकसः । सन्धेः कोशाभिधानस्य प्रविवेशोपवेशनं ।
दिनेऽवन्तिपुरादीनां पुराणामन्तरेण तं । व्रजन्तं विधुरं केचिन्नाशकन् बाधितुं द्विषः ।
तद्वैधुर्य्यविधानं तत्प्रजासंहारकार्य्यभूत् । प्रमादान्नृपतेः कुड्यवेतालोत्थापनोपमं ।
चोरोऽथ तीव्रणधीर्दृढः सह पृथ्वीहरेण सः । अढौकयत्क्रमाग्रामान्तरेऽष्टादश डामरान् ।
अभेद्यमहसांस्तान् जेतुं निर्यातो विजयेश्वरं । न्ययुङ्क्त भूभृत्संभ्रान्तस्तिलकं कम्पनापतिं ।
संग्रामैः खण्डशः कुर्व्वन् स तानतुलविक्रमः । विद्रावयामास रयैः पुरोवायुरिवाम्बुदान् ।
संमानावसरे तस्य जिता यातस्य डामरान् । प्रवेशं प्रत्युत नृपो न प्रादादवमानकृत् ।
स भग्नमानो नगरं प्रविष्टे नृपतौ ततः । खिन्नः स्ववेश्मन्यवसत् स्वामिकार्य्ये निरुद्यमः ।
सम्प्राप्ताः समशीर्षिकां विमद्रसैर्मुख्यैर्निरुद्धादया वैरे विद्विषतां कृता धुरि पदं सन्तो बहिः स्थापिताः ।
कार्य्यान्तेऽद्भुतकर्मकौशलकृतावज्ञाविरागस्पृशः । सर्पाकीर्णमिवाशु वेश्म स्वहिणो भृत्यास्त्यजन्ति प्रभुं ।
त्यक्तकार्य्यानुसन्धाने तस्मिन् सर्व्वत्र डामराः । सम्भृतिं विक्रियां निन्युः कृषिं चयधमादव ।
आतङ्कोद्वेजितैर्विप्रैः कृतप्रायैः पुरे पुरे । वह्नौ कृताग्निभिर्घोरा स्वकीर्तिरुदपद्यत ।
उपसर्गेण तुरगाः करभाश्च क्षयं गताः । न्यवेदयन्मण्डलस्य प्रत्यासन्नमहाभयं ।
प्रत्यासन्नाशुभा कम्पं भयेन जनता दधे । आसन्नवज्रपतना वातेनेव द्रुमावलिः ।
अथ बलवतोऽस्य प्रारम्भे डामरावलिः । उपस्पृष्टा हिमानीव बभूवापतनोन्मुखी ।
प्रथमं देवसरसादिसंप्रसरन्ततः । मुख्यं व्यथावशोगण्ड इव पाकं व्यदर्शयत् ।
एककार्य्यत्वमानीय टिक्कादीन् गोत्रजान् बली । स्यामस्थं विजयोऽभ्येत्य राजानीकमवेष्टयत् ।
तत्र कायस्थपुत्रोऽपि श्यामलानीकनायकः । संरब्धं नागवद्धास्यखड्गे तस्य चिरं युधि ।
कथञ्चिदथ भूपेन प्रार्थितः कम्पनापतिः । निर्ययौ स्वामिरोषेऽप्यात्तसंरतिर्यशोऽर्णवः ।
विजयेन समं तस्य बहुमूल्येन संयुगे । सन्देहं प्राणहारिस्य जयश्रीरावहद्ययौ ।

प्रवृद्धिं मल्लकोष्ठेऽपि प्रयाते लहरान्तरे । वैशाखे निर्ययौ राजा ग्रामं चन्द्रोरकाभिधं ।
सैनिकाः शत्रुभिस्तस्य भ्रामितास्तत्र रात्रिषु । अरातिं निर्ययौ धीरैः स्वप्नैरिव कुमुद्वतः ।
बाल्ममात्रमकारि येन सर्व्वक्षमिमतां वरः । येन दर्पनरेन्द्रोऽपि विधुरेणोदपाद्यत ।
भूरीपंथा जितवतो विक्रमेण महीमिमां । माहमानां न मल्लाभि जामदग्न्यस्य यस्य वा ।
स मल्लचलविक्रान्तिः कालस्य बलवत्तया । तत्र भग्नबलोऽकस्माद्व्ययुज्यत जयश्रिया ।
ततः पलायिते तस्मिन्नकस्मादित्य मल्लकं । हालिग्रामस्थितो वीरं भङ्गं पृथ्वीहरोऽनयत् ।
पलायितस्यानुसरंस्तस्य पृष्ठं स निष्ठुरः । प्रतापी नगराभ्यर्णे दग्ध्वा मागमठं ययौ ।
स चान्ये च ततः क्रूरा डामराः सर्व्वतोऽभ्ययन् । राज्ञो राजाश्रितानाश्च चरकेभ्यस्तुरङ्गमान् ।
निस्त्रिंशतो तीव्रकोपसानो भूपः समाश्रयत् । अभाग्यभागिनां योग्यामासनस्थे कृपद्रुति ।
नीतो पृथ्वीहरस्याथ हता डामरमन्तिकं । पृष्ठन्यस्तविषं मोज्यमिव राज्ञो व्यसर्जयत् ।
विसृज्य भ्रातरं दर्श्यं विन्दकस्य तथैव सः । अन्येषां प्राहिणोत्पार्श्वं भ्रातृन् पुत्रांश्च विप्लुतः ।
मातरं जयकाराख्यस्य मिक्षिकायामसंमितः । विच्छिन्नकर्णघ्राणांश्च कृत्वाभ्यर्णे व्यसर्जयत् ।
सपुत्रं सुय्यकं मल्लोऽधिराज्ये नगरे परान् । भूरीन् बध्यानबध्यांश्च कोधाकाली न्यपातयत् ।
कालस्येवोल्बणस्याथ तस्य सर्व्वेऽपि शङ्किताः । आभ्यन्तराश्च बाह्याश्च विरागं प्रतिपेदिरे ।
येनवानीतिमार्गेण हारितं हर्षभूभुजा । निःश्रयणादधे तं स राज्ये व्यवहरन् स्वयं ।
प्रविष्टानां टङ्क गहनकरिकर्म्मप्रगल्भिनां प्रसक्तानां द्यूते नरपतिधुरायां विहरतां ।
तदस्यानेके स्खलितमसकृत्सोऽर्हति परं प्रयोगे वैकल्यं स्वयमविकलो यो न भजते ।
सोऽप्रयत्नो नृपतिस्तत्राभि विजिगीषसः । निनाय मल्लकोष्ठादीन् किञ्चिन्मन्दप्रतापतां ।
अथाभिनाय विजयो विजयाद्ध्वनाशनैः । सप्तारं हर्षदेवस्य तं मित्राचरमन्तिकं ।
विविधान्देशसरसं कम्पनापतिना ततः । विद्राव्यमाणः सम्भ्रायाप्रधावन्सोऽपतत् चितौ ।
परिक्राय हतस्याथ स तस्य विजयो शिरः । विससर्जान्तिकं राज्ञः फलं जयतरोरिव ।
तदप्यत्यद्भुतं कर्म्म सजल्पसूत्कृतघ्नतां । न तस्य तुष्टस्तुष्टाव न चकार च सत्क्रियां ।
आजानस्वघनान्सु सम्भ्राम्यः कम्पनापतिः । तत्र कस्मात्त्वोन्मेक इति तं सन्दिदेश च ।
सर्व्वप्रकारं तिलकः कृतघ्नं नृपतिं विदन् । अथ जातविरागः स द्रोहोन्मुख्यं समादधे ।
सतां स्यादनुपालभ्योऽसञ्जैर्मुख्येनैव चेत् । द्रोहेच्छया स निर्याय ययाववयाम्नामतां ।
लेखाश्चापि तस्मै रचिताञ्चलक्षल्यकल्पं नीतिप्रियाः प्रतिपदं समुदाहरन्तु ।
मानोन्नतास्तु विदितस्तुतयः कृतघ्नेऽस्यकाप्यमून्यरहितं घटयन्ति सन्तः ।
पटं वज्रिकर्म्मज्वलितमचिदष्टाश्ववमरैः श्रुतिं यातं सन्तं पतननिरतां जीर्णवसतिं ।
अमेवाङ्गं भूपं व्यसनविमुखं स्निग्धमजहन्न धीरोऽप्युत्यासोपहतमहिमा शर्म लभते ।
इत्युपायं परित्यज्य न्याय्यं ये प्रभवे क्रुधि । द्रोग्धारः कथितास्तेभ्यः कोऽन्ये पापीयसां धुरि ।

